National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 232-233
© 2025 NJHSR
www.sanskritarticle.com

**डॉ. सुमनदासः**
अद्वैतवेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-श्वविद्यालयः, नवदेहली-110016

.

**Correspondence:**
**डॉ. सुमनदासः**
अद्वैतवेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-श्वविद्यालयः, नवदेहली-110016

# शङ्कराचार्येण स्थापितमठानां विषये एका संक्षिप्ता आलोचना

**डॉ. सुमनदासः**

भगवत्पादश्रीशङ्कराचार्येण अद्वैतपरमपरायाः चतुर्णां मठानां स्थापना कृता। ततः भक्तिपरम्परायाः आचार्यः भगवत्पादः श्रीरामानुजाचार्योऽभवत्। तेन द्विसप्ततिः वैष्णवमठानां स्थापना कृता ये भक्तिधारापरम्परायाः श्रीवैष्णवमठाः कथ्यन्ते। ये च भक्तिधारायाः प्रमुखस्रोतांसि सन्ति। ते द्राविडाम्नायमठोऽपि उच्यते। मुख्यरूपेण भारतीयवैदिकज्ञानभक्तिपरम्परायाः वा सम्वर्धने उभयोरा-चार्ययोः महनीययोगदानं वर्तते। इदानीं हिन्दूधर्मज्ञानाय यत् किञ्चित् परिचयात्मकमूर्तस्वरूपमस्ति, तत् आचार्यैः स्थापितं मठमन्दिरं वर्तते। इदं विना हिन्दूसनातनधर्मस्य ज्ञानं दुरूहं वर्तते। आर्यावर्ते सन्यासधर्मस्य ग्रहणं अस्मिन्नेव मठे अभवत् तथा गुरुशिष्यपरम्परायाः निर्वहनमभूत्। अस्मिन्नेव परम्परायां विशेषनियमानां, संकल्पानां, आध्यात्मिकपृष्ठभूमीनां च निर्धारणं कृत्वा योग्यसन्यासिनां सनातनधर्मप्रचारप्रसाराय देवभूमिभारते भ्रमणगायनादिं कुर्वतः जनजागरणाय धर्मस्य प्रचारं कुर्वन्ति तेषां संज्ञा शङ्कराचार्य इति भवति । वस्तुतः एवं वक्तुं शक्यते इदानीं वर्तमानपरिस्थितौ सनातनधर्मस्य यत्र कुत्रापि वर्तत तानि मठमन्दिराण्येव वर्तन्ते। इदानीं मठमन्दिराणि केवलमेव धार्मिकसास्कृतिकैतिहासिकेषु सीमितो नास्ति अपितु चिकित्सीयज्ञान-विज्ञानसंगीतसाधनबाह्यानाम् उद्देश्यानां च केन्द्रमस्ति। येन अस्माकं देशसमाजश्च सिञ्चितो भवति ।

मठे धर्माचार्येण दत्ता शिक्षा न हि मुख्यतः वैदिकी आध्यात्मिकी भवति। परन्तु तदतिरिक्तं सामाजिकव्यवस्थासेवाराष्ट्रकल्याणादीनामपि शिक्षा दीयते। मठाम्नायमहानुशासने भगवत्पादशङ्करा-चार्येण मठानां लक्ष्योद्देश्येनोक्तं यत् मठमठाधिपतिभिश्च सम्पत्तिसंयमः कर्तव्यः। मठे एवमन्नादि भवितव्यं यत् महामार्यादिसंकटसमये स्वक्षेत्रे सामाजिकव्यवस्थास्थिरीकर्तव्ये समर्थं स्यात्। असहायपीडितदरिद्राणां कृते आश्रयो देयः स्यात्, मठे दरिद्रतायाः लेशमपि न स्यात्। पीठासीनाचार्यसन्यासिपीठस्य वा वैभवस्य प्रयोगः वैदिकधर्मराष्ट्रधर्मसनातनसंस्कृतेः प्रचारप्रसाराय रक्षणाय च स्यात्। स्वजीवनसाधनाय कैंकर्याय अलमेवं प्रयोगः कर्तव्यः। सन्यासीनां संग्रहबुद्धिः न स्यात् मठाधिपतिः स्ववैदिकहिन्दूराष्ट्ररक्षणाय स्व-स्वक्षेत्रं गत्वा यत्र धर्मस्य प्रचारः कर्तव्यः। तत्र गत्वा भ्रमणं कृत्वा जनमानसे वर्णाश्रमधर्मस्य, कर्तव्यस्य सदुपदेशं कुर्यात्। समये-समये धार्मिकचर्चानां गोष्ठीनां च आयोजनं कृत्वा धार्मिकयोजनानुसारेण राष्ट्रीय-धार्मिकव्यवस्थां योजनाय सुचारुरूपेण चलनाय च प्रयत्नो विधेयः।

प्रत्येकं मठानां सिद्धान्तेषु भावनात्मकक्रियात्मकरूपेण यद्यपि किञ्चिद्भिन्नता वर्तते तथाप्ययमवैदिको नास्ति अपितु वैदिकसिद्धान्ताः एव सर्वेषां मठानां मूले वर्तते। प्रत्येकमठाः स्व-स्वमतानुसारेण क्रियाकलापानां क्रियान्वितं कुर्वन्ति। अर्थात् सर्वेषां मठानां लक्ष्यं सिद्धान्तश्च एक एव वर्तते।

भारतीयसंस्कृतेः मूले वेदोऽस्ति। भगवान् स्वयं अनेकावतारं गृहीत्वा वेदधर्मयोः रक्षां करोति। क्वचित् भगवता स्वयं धर्मस्य रक्षां करोति क्वचित् महापुरुषस्य अवताररुपेण धर्मस्य स्थापनां कुर्वन् स्वसत्तायाः परिचयं ददति। वैदिकसनातनधर्मस्य भूमण्डले अनेकर्षितपस्विमहापुरुषाचार्याणां च जीवनगाथायाः उल्लेखः प्राप्यते। भगवत्पादशङ्कराचार्यस्य पूर्वमपि अनेके आचार्याः आसन्यस्योल्लेखः भगवत्पाद-

शङ्कराचार्येण स्वग्रन्थेषु कृतः तेन बौद्धादिनास्तिकमतानां खण्डनं कृत्वा अद्वैतमतस्य स्थापना कृता तथा अनेकग्रन्थेषु भाष्यं कृतम्। शङ्कराचार्येणाद्वैतपरम्परायाः स्थापनां कृत्वा सनातनधर्मस्य रक्षणाय चतसृषु दिक्षु चतुर्णां पीठानां स्थापना कृता। याः चतुर्वेदानां सम्वर्धनाय भौतिकपरम्परायाः रूपे प्रवाह्मानाः वर्तन्ते। अस्मिन् मठे भारतस्य ज्ञानविज्ञानाध्यात्मधर्माणामुत्पादनं संवर्धनं च भवति। यतः स्वतः स्फूर्तज्ञानराशेः प्रकाशो भवति। ऐतिहासिकरूपेण मठपरम्परायाः आविर्भावं शङ्कराचार्येण प्राप्नोति। मठानां अन्यसंज्ञा चातुराम्नाय इत्यस्ति। शङ्कराचार्येण स्थापितमठानां नामानि -

1. **पूर्वे -** गोवर्धनमठम् (जगन्नाथपूरौ) - प्रथमाचार्यः - पद्मपादाचार्यः (ऋग्वेदः)
2. **पश्चिमे-** शारदामठम् (द्वारकायाम्) - प्रथमाचार्यः- हस्तामाल-काचार्यः (सामवेदः)
3. **उत्तरे -** ज्योतिमठम् (बद्रीनाथे) - प्रथमाचार्यः- तोटकाचार्यः (अथर्ववेदः)
4. **दक्षिणे -** श्रृङ्गेरीमठम् (रामेश्वरे) - प्रथमाचार्यः- सुरेश्वराचार्यः (यजुर्वेदः)

एषां मठानां स्व-स्व विशेषताः सन्ति। प्रत्येकमठानां स्व-स्व परम्पराः वर्तन्ते। एकस्मिन् मठे केवलेकमेव मठाधीशस्याभिषेकविधिः प्राप्यते ।

**सन्दर्भग्रन्थसुची:**


1. वेदान्तपरिभाषा, धर्मराजाध्वरीन्द्र, शरच्चन्द्र घोषाल, संस्कृत पुस्तक भण्डार, 2004
2. भामती(शारीरकभाष्यव्याख्या),वाचस्पतिमिश्रः, स.-अनन्तकृष्ण-शास्त्री, निर्णयसागर प्रेस, बम्बई, 1938
3. ब्रह्मसूत्रशाङ्करभाष्यम्,श्रीशङ्कराचार्यः,श्रीकृष्णसेमवालः,दिल्ली संस्कृत अकादमी।
4. वेदान्तसारः, सदानन्दयोगीन्द्राचार्यः, सुबोधनीटीकाप्रणेता श्रीनृसिंहसरस्वती, स. आचार्यज्योतिः सेनगुप्ता, संस्कृतबुकडिपो, कोलकाता, 2015
5. अद्वैतसिद्धिः, बालबोधिनीव्याख्यासहिता, योगेन्द्रनाथदेवेन्द्रशर्मा , तारापबलिकेशन्स चैत्रे , 2006
6. अद्वैतदीपिका,नृसिंहाश्रमस्वामिनः,सम्पूर्णानन्दसंस्कृत विश्वविद्या-लयः , वाराणसी, 1984
7. आगमप्रमाणम् यमुनाचार्यः ओरियन्टल इन्स्टिटयुट् बडौदा, 1976
8. ईशादिदशोपनिषदः मोतीलालबनारसीदासः, प्रथमसंस्करणम्, देहली 2002
9. उपनिषत्संग्रहः पं.जगदीशशास्त्री, मोतीलालबनारसीदासः, पुन-मुद्रितसंस्करणम् नवदेहली, 1998
10. छान्दोग्योपनिषदः , शाङ्करभाष्यम् , मोतीलालबनारसीदासः , वाराणसी , 1978
11. ब्रह्मसूत्रशाङ्करभाष्यम् (सत्यानन्दीटीका) सत्यानन्दसरस्वती गोविन्दमठ वाराणसी, 1992
12. ब्रह्मसूत्रशाङ्करभाष्यम् (भामती) वाचस्पतिमिश्रः चौखम्बा विद्याभवन, 2014
13. ब्रह्मसूत्रशाङ्करभाष्यम्, श्रीशङ्करग्रन्थावली, मोतीलाल-बनारसीदास : 2015
14. ब्रह्मसिद्धिः आचार्यमण्डनमिश्रा सम्पादकः प्रो. केदारनाथ त्रिपाठी, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली. 1999
15. ब्रह्मविद्याभरणम् श्रीमद्वैतानन्दस्वामिनः, संस्कृत एजुकेशन सोसइटी, मद्रास, 1976
16. बृहदारण्यकोपनिषद् ,गीताप्रेस गोरखपुरम् पुनर्मुद्रितसंस्करणम्
17. वेदान्तपरिभाषा, डॉ.श्रीगजाननशास्त्रीमुसलगांवकरः, सम्पादकः श्रीराशास्त्रीमुसलगांवकर, चौखम्बा विद्याभवन, वाराणसी, 1983


**अन्तजाशिसंकेत**


1. www.archive.org
2. www.epathshala.nic.in
3. www.epustakalay.com
4. http://www.bing.com
5. www.sankrachary.nic
6. www.sankrachary.nic